Class 7 Sanskrit Chapter 5

प्रश्न 1. एकपदेन उत्तरत– (एक पद में उत्तर दीजिए-)

(क) 'पण्डिता' 'सरस्वती' इति उपाधिभ्यां का विभूषिता?

उत्तरम्– रमाबाई।

(ख) रमा कुतः संस्कृतशिक्षां प्राप्तवती?

उत्तरम्– स्वमातुः।

(ग) रमाबाई केन सह विवाहम् अकरोत्?

उत्तरम्– विपिनबिहारीदासेन।

(घ) कासां शिक्षायै रमाबाई स्वकीयं जीवनम् अर्पितवती?

उत्तरम्– नारीणाम्।

(ङ) रमाबाई उच्चशिक्षार्थं कुत्र अगच्छत्?

उत्तरम्– इंग्लैण्डदेशम्।

प्रश्न 2. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–

(रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए-)

(क) रमायाः पिता समाजस्य प्रतारणाम् असहत।

(ख) पत्युः मरणानन्तरं रमाबाई महाराष्ट्रं प्रत्यागच्छत्।

(ग) रमाबाई मुम्बईनगरे 'शारदा-सदनम्' अस्थापयत्।

(घ) 1922 तमे खिष्टाब्दे रमाबाई-महोदयायाः निधनम् अभवत्।

(ङ) स्त्रियः शिक्षां लभन्ते स्म।

उत्तरम्–प्रश्ननिर्माणम्–

(क) कस्याः पिता समाजस्य प्रतारणाम् असहत?

(ख) कस्य मरणानन्तरं रमाबाई महाराष्ट्रं प्रत्यागच्छत्?

(ग) रमाबाई कुत्र 'शारदा-सदनम्' अस्थापयत्?

(घ) 1922 तमे खिष्टाब्दे कस्याः निधनम् अभवत्?

(ङ) काः शिक्षां लभन्ते स्म?

प्रश्न 3. प्रश्नानामुत्तराणि लिखत–

(प्रश्नों के उत्तर लिखिए-)

(क) रमाबाई किमर्थम् आन्दोलनं प्रारब्धवती?

(रमाबाई ने किसलिए आन्दोलन आरम्भ किया था?)

उत्तरम्– रमाबाई स्त्रीणां कृते वेदादीनां शास्त्राणां शिक्षायै आन्दोलनं प्रारब्धवती।

(रमाबाई ने स्त्रियों के लिए वेद आदि शास्त्रों की शिक्षा के लिए आन्दोलन आरम्भ किया था।)

(ख) निःसहायाः स्त्रियः आश्रमे किं लभन्ते स्म?

(बेसहारा स्त्रियाँ आश्रम में क्या प्राप्त करती थीं?)

उत्तरम्– निःसहायाः स्त्रियः आश्रमे मुद्रण-टङ्कण-काष्ठकलादीनाञ्च प्रशिक्षणं लभन्ते स्म।

(बेसहारा स्त्रियाँ आश्रम में छपाई, टङ्कण, काष्ठकला आदि का प्रशिक्षण प्राप्त करती थीं।)

(ग) कस्मिन् विषये रमाबाई-महोदयायाः योगदानम् अस्ति?

(किस विषय में रमाबाई महोदया का योगदान है?)

उत्तरम्– समाजसेवायां लेखनक्षेत्रे च रमाबाई-महोदयायाः योगदानम् अस्ति।

(समाज-सेवा और लेखन-क्षेत्र में रमाबाई महोदया का योगदान है।)

(घ) केन रचनाद्वयेन रमाबाई प्रशंसिता वर्तते?

(कौनसी दो रचनाओं से रमाबाई प्रशंसनीय है?)

उत्तरम्– 'स्त्रीधर्मनीति' तथा 'हाई कास्ट हिन्दू विमेन' इति रचनाद्वयेन रमाबाई प्रशंसिता वर्तते।

('स्त्रीधर्मनीति' तथा 'हाई कास्ट हिन्दू विमेन' इन दो रचनाओं से रमाबाई प्रशंसनीय हैं।)

प्रश्न 4. अधोलिखितानां पदानां निर्देशानुसारं पदपरिचयं लिखत–

(अधोलिखित पदों के निर्देशानुसार पद-परिचय लिखिए-)

	पदानि	**मूलशब्दः**	**लिङ्गम्**	**विभक्तिः**	**वचनम्**
यथा–	वेदानाम्	वेद	पुँल्लिङ्गम्	षष्ठी	बहुवचनम्
	पिता	.....	.....	.....	.....
	शिक्षायै	.....	.....	.....	.....
	कन्याः	.....	.....	.....	.....
	नारीणाम्	.....	.....	.....	.....
	मनोरमया	.....	.....	.....	.....

उत्तरम्–

पदानि	**मूलशब्दः**	**लिङ्गम्**	**विभक्तिः**	**वचनम्**
पिता	पितृ	पुँल्लिङ्गम्	प्रथमा	एकवचनम्
शिक्षायै	शिक्षा	स्त्रीलिङ्गम्	चतुर्थी	एकवचनम्
कन्याः	कन्या	स्त्रीलिङ्गम्	प्रथमा	बहुवचनम्
नारीणाम्	नारी	स्त्रीलिङ्गम्	षष्ठी	बहुवचनम्
मनोरमया	मनोरमा	स्त्रीलिङ्गम्	तृतीया	एकवचनम्

प्रश्न 5. अधोलिखितानां धातूनां लकारं पुरुषं वचनञ्च लिखत–

(अधोलिखित धातुओं के लकार, पुरुष और वचन लिखिए-)

	पदम्	**धातुः**	**लकारः**	**पुरुषः**	**वचनम्**
यथा–	आसीत्	अस्	लङ्	प्रथमपुरुषः	एकवचनम्
	कुर्वन्ति	.....	.....	.....	.....
	आगच्छत्	.....	.....	.....	.....
	निवसन्ति	.....	.....	.....	.....
	गमिष्यति	.....	.....	.....	.....
	अकरोत्	.....	.....	.....	.....

उत्तरम्–

पदम्	**धातुः**	**लकारः**	**पुरुषः**	**वचनम्**
कुर्वन्ति	कृ	लट्	प्रथमः	बहुवचनम्
आगच्छत्	आ + गम्	लङ्	प्रथमः	एकवचनम्
निवसन्ति	नि + वस्	लट्	प्रथमः	बहुवचनम्
गमिष्यति	गम्	लृट्	प्रथमः	एकवचनम्
अकरोत्	कृ	लङ्	प्रथमः	एकवचनम्

प्रश्न 6. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत–

(अधोलिखित वाक्यों को घटनाक्रमानुसार लिखिए-)

(क) रमाबाई-महोदयायाः विपिनबिहारीदासेन सह विवाहः अभवत्।

(ख) 1858 तमे खिष्टाब्दे रमाबाई जन्म अलभत।

(ग) सा उच्चशिक्षार्थम् इंग्लैण्डदेशं गतवती।

(घ) 1922 तमे खिष्टाब्दे रमाबाई-महोदयायाः निधनम् अभवत्।

(ङ) सा मुम्बई नगरे शारदा-सदनम् अस्थापयत्।

(च) सा स्वमातुः संस्कृतशिक्षां प्राप्तवती।

उत्तरम्– (क) 1858 तमे खिष्टाब्दे रमाबाई जन्म अलभत।

(ख) सा स्वमातुः संस्कृतशिक्षां प्राप्तवती।

(ग) रमाबाई-महोदयायाः विपिनबिहारीदासेन सह विवाहः अभवत्।

(घ) सा उच्चशिक्षार्थम् इंग्लैण्डदेशं गतवती।

(ङ) सा मुम्बईनगरे शारदा-सदनम् अस्थापयत्।

(च) 1922 तमे खिष्टाब्दे रमाबाई-महोदयायाः निधनम् अभवत्।